वैदिकव्याकरणम्

१६

अष्टाध्याय्याः प्रथमद्वितीयौ अध्यायौ

प्रस्तावना

संस्कृतवाङ्मये शब्दः द्विविधः लौकिकः वैदिकश्चेति। तयोः बोधः व्याकरणात् ऋते असम्भवः। तच्च व्याकरणम् लौकिकम् वैदिकम् चेति द्वेधा विभक्तम्। सन्ति च लौकिकवैदिकशब्दज्ञानाय नैके व्याकरणग्रन्थाः। तत्र पाणिनीयव्याकरणम् उभयविषयकं वर्तते। भगवता पाणिना अष्टाध्यायी रचिता। ताम् च आश्रित्य श्रीमता भट्टोजीदीक्षितेन वैयाकरणसिद्धान्तकौमुदी प्रातन्यत। तस्याः अन्तिमांशे वैदिकी प्रक्रिया प्रदर्शिता। इतः परम् पाठेषु सा एव वैदिकी प्रक्रिया प्रदर्शयिष्यते। परन्तु पाठविस्तरभयात् चितानाम् एव सूत्राणाम् आलोचना विधास्यते। सूत्रचनयस्य क्रमस्तु अष्टाध्यायीक्रमानुसारी। अर्थात् अष्टाध्याय्याम् येन क्रमेण वैदिकव्याकरणस्य सूत्राणि सन्ति तेन क्रमेण अत्र उपात्तानि। अत एव पाठस्य नाम अपि तदनुरूपमेव।

तत्रादौ अस्मिन् प्रथमे पाठे ये विषयाः आलोचयिष्यन्ते तेषु केचन - पुनर्वस्वोः द्वयोः एकवचनम्, षष्ठ्यन्तस्य पतिशब्दस्य घिसंज्ञा, इत यजेः करणे, छन्दसि बहुलं षष्ठी इत्यादि। लौकिकप्रयोगे तावत् धातोः पूर्वम् उपसर्गाणां प्रयोगो भवति। वेदे तु उपसर्गाणां धातोः परम्, कदाचित् च व्यवधानेन प्रयोगः सम्भवति, धातोः परमपि प्रयोगः सम्भवति। परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः इत्यादिनियमेन द्वन्द्वसमासस्य परवल्लिङ्गं प्रसिद्धम्, वेदे तावत् द्वन्द्वस्य पूर्ववल्लिङ्गमपि भवति। अत्र च पाठे बहुलशब्दार्थोऽपि वक्ष्यते। किञ्च षष्ठीयुक्तश्छन्दसि वा इत्यस्य योगविभागेन सर्वे विधयश्छन्दसि विकल्प्यन्ते इति या परिभाषा सिध्यति सास्मिन् प्रदर्शयिष्यते। अत्र च पाठे भवतां बोधसौकर्याय तत्तत्सूत्रव्याख्यानावसरे वैदिकरूपैः सह लौकिकरूपाणि अपि उल्लेखिष्यन्ते।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- छन्दसि रूपप्रक्रियायाम् लौकिकप्रक्रियातः को भेदः इति ज्ञास्यति।
- वेदे सर्वोऽपि विधिः विकल्पेन भवति इत्येतदर्थबोधिकाम् परिभाषाम् बुध्यात्।
- कस्यचित् शब्दस्य लौकिकरूपम् वैदिकरूपम् च किम् भवति इति ज्ञास्यति।
- वेदे द्वन्द्वस्य पूर्ववल्लिङ्गमपि भवति इत्यवगमिष्यति।

- वेदे उपसर्गाणां कथं प्रयोगः इति बुध्यात्।
- निपातविषयिणी चर्चाम् अवगच्छेत्।
- बहुलशब्दार्थं ज्ञास्यति।

पुनर्वसुशब्देन उद्भूतावयवस्य ज्योतिःसमुदायस्य अभिधानाद् द्वयोः द्विवचने प्राप्ते सूत्रमिदम् आरभ्यते -

१६.१) छन्दसि पुनर्वस्वोरेकवचनम्॥ (१.२.६१)

सूत्रार्थः - छन्दसि पुनर्वस्वोः एकचनम् वा स्यात्।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् त्रीणि पदानि सन्ति। छन्दसि पुनर्वस्वोः एकवचनम् इति सूत्रगतपदच्छेदः। छन्दसि इति सप्तम्यन्तं पदम्, अत्र वैषयिकसप्तमी। छन्दः इति शब्दस्य वेदः इत्यर्थः। अतः छन्दसि इत्यस्य वेदे इत्यर्थः। पुनर्वस्वोः इति षष्ठ्यन्तं पदम्। एकवचनम् इति प्रथमान्तं पदम्। फल्गुनीप्रोष्ठपदानां च नक्षत्रे इति सूत्रात् नक्षत्रे इति पदमनुवर्तते। तच्च षष्ठीद्विवचनान्ततया विपरिणमते। अस्मदो द्वयोश्च इति सूत्रात् द्वयोः इति पदमनुवर्तते। जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् इति सूत्रात् अन्यतरस्यामिति पदमत्रानुवर्तते। तच्च विकल्पार्थकम् सप्तमीविभक्तिप्रतिरूपकमव्ययम्। सूत्रार्थो हि वेदविषये नक्षत्रवाचकात् पुनर्वसुशब्दात् द्वित्वे वाच्ये विकल्पेन एकवचनम् भवति इति। तेन पक्षे द्विवचनमपि भवति। लोके तु द्विवचनमात्रम् भवति।

उदाहरणम् - पुनर्वसु, पुनर्वसू।

सूत्रार्थसमन्वयः - अश्विनीभरण्यादिषु सप्तविंशतिसंख्यकेषु नक्षत्रेषु पुनर्वसु नक्षत्रं सप्तमम्। एवञ्च नक्षत्रवाचकात् पुनर्वसुशब्दात् द्विवचने प्राप्ते प्रकृतसूत्रेण एकवचनविधानात् सुप्रत्यये स्वमोर्नपुंसकात् इत्यनेन सोः लुकि **पुनर्वसु** इति प्रयोगः सिध्यति। उक्तसूत्रेण वैकल्पिकद्विवचनविधानात् द्विवचनपक्षे औप्रत्यये प्रक्रियया **पुनर्वसू** इति द्विवचनान्तः प्रयोगोऽपि भवति। लोके तु **पुनर्वसू** इत्येव केवलं द्विवचनान्तः प्रयोगो भवति।

विशाखाशब्देन उद्भूतावयवस्य ज्योतिःसमुदायस्य अभिधानाद् द्वयोः द्विवचने प्राप्ते सूत्रमिदम् आरभ्यते -

१६.२) विशाखयोश्च॥ (१.२.६२)

सूत्रार्थः - छन्दसि विशाखयोः विकल्पेन एकवचनम् स्यात्।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् द्वे पदे स्तः। विशाखयोः च इति सूत्रगतपदच्छेदः। विशाखयोः इति षष्ठीद्विवचनान्तं पदम्। च इति अव्ययपदम्। छन्दसि पुनर्वस्वोरेकवचनम् इति सूत्रात् छन्दसि इति एकवचनं चेति पदद्वयमनुवर्तते। जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् इति सूत्रात् अन्यतरस्यामिति पदमत्रानुवर्तते। फाल्गुनीप्रोष्ठपदानां च नक्षत्रे इति सूत्रात् नक्षत्रे इति पदमनुवर्तते। तच्च षष्ठीद्विवचनान्ततया विपरिणमते। अस्मदो द्वयोश्च इति सूत्रात् द्वयोः इति पदमनुवर्तते। सूत्रार्थो हि वेदे

नक्षत्रवाचकात् विशाखशब्दात् द्वित्वे वाच्ये विकल्पेन एकवचनम् स्यात् इति। सप्तविंशतिसंख्यकेषु नक्षत्रेषु 'विशाखा' भवति षोडशशतमः नक्षत्रविशेषः। 'विशाखा' इति नक्षत्रनाम्ना 'वैशाख' इति मासस्य नामकरणं जातम्।

उदाहरणम् - विशाखा, विशाखे।

सूत्रार्थसमन्वयः - नक्षत्रवाचकात् विशाखाशब्दात् द्विवचने प्राप्ते प्रकृतसूत्रेण एकवचनविधानात् **विशाखा** इति प्रयोगो भवति। उक्तसूत्रेण वैकल्पिकैकवचनविधानात् द्विवचनपक्षे **विशाखे** इत्यपि प्रयोगो भवति। लोके तु द्विवचनमेव। तेन **विशाखे** इत्येव प्रयोगः।

पतिः समास एव (१.४.८) इति सूत्रेण पतिशब्दस्य समासमात्रे घिसंज्ञा विधीयते। तेन असमासे पतिशब्दस्य घिसंज्ञा न भवति। एतत्तु लोके। किन्तु वेदे असमासेऽपि घिसंज्ञा यथा स्यात् तदर्थम् अग्रिमसूत्रम् आरभ्यते -

१६.३) षष्ठीयुक्तश्छन्दसि वा॥ (१.४.९)

सूत्रार्थः - षष्ठ्यन्तेन युक्तः पतिशब्दः छन्दसि घिसंज्ञो वा स्यात्।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् त्रीणि पदानि सन्ति। षष्ठीयुक्तः छन्दसि वा इति सूत्रगतपदच्छेदः। षष्ठीयुक्तः इति प्रथमान्तं पदम्। तस्य च अर्थो भवति षष्ठ्यन्तेन युक्तः इति। छन्दसि इति सप्तम्यन्तं पदम्, अत्र वैषयिकसप्तमी। वा इति विकल्पार्थकम् अव्ययम्। पतिः समास एव इति सूत्रात् पतिः (१/१) इति पदमनुवर्तते। शेषो घ्यसखि इति सूत्रात् घि इत्यनुवर्तते। (घि इति एका संज्ञा। सा च शेषो घ्यसखि इति सूत्रेण विधीयते। तदर्थः ह्रस्वौ यौ इदुतौ तदन्तं सखिवर्जं घिसंज्ञम् भवति इति)।

षष्ठीयुक्तश्छन्दसि वा इत्यस्य योगविभागः क्रियते। योगः नाम सूत्रम्। षष्ठीयुक्तश्छन्दसि इत्येकः योगः (सूत्रम्), वा इति अपरः योगः (सूत्रम्)। 'वा' इति द्वितीयसूत्रे छन्दसि इति पदम् अनुवर्तते। तेन 'वा छन्दसि' इति द्वितीयसूत्रस्य आकारः। तत्र प्रथमसूत्रस्य अर्थो हि वेदविषये षष्ठ्यन्तेन युक्तः पतिशब्दः घिसंज्ञको भवति इति। द्वितीयसूत्रार्थस्तावत् - व्याकरणशास्त्रे यावत् कार्यम् वर्तते तद् वेदे विकल्पेन भवति इति। तेन प्रथमसूत्रेण यो विधिः उक्तः सोऽपि विकल्पेन भवति इत्यायाति। एवञ्च योगविभागे कृते द्वितीययोगेन प्रथमसूत्रस्य यः अर्थः आयातः स तु पाणिनिकृतेन षष्ठीयुक्तश्छन्दसि वा इति मूलसूत्रेणैव सिद्धः। अतः अयम् योगारम्भः व्यर्थः भवति। व्यर्थः सन् ज्ञापयति यत् सर्वे विधयश्छन्दसि विकल्प्यन्ते इति। तेन योगारम्भे कृते सति प्रथमसूत्रेण यो विधिः उक्तः सः विकल्पेन भवति इति सिध्यति। एवं योगविभागः स्वांशे चरितार्थः। अन्यत्रापि अस्य फलम् अस्ति। यथा - प्रतीपमन्य उर्मिर्युद्ध्यति इति आत्मनेपदप्रयोगस्थले युद्ध्यति इति परस्मैपदप्रयोगोऽपि भवति। योगारम्भः न क्रियते चेत् षष्ठीयुक्तश्छन्दसि वा इति सूत्रे यत् विकल्पत्वम् उच्यते तत् तस्मिन्नेव स्यात्। अन्यत्र न स्यात्। किन्तु अन्यत्रापि विकल्पत्वम् यथा स्यात् तदर्थम् अयम् योगविभागः कृतः। बहुलं छन्दसि इत्यादिः तस्यैव प्रपञ्चः। तेन प्रथमसूत्रेण विधीयमानं कार्यं छन्दसि विकल्पेन इति लभ्यते।

उदाहरणे सूत्रार्थसमन्वयः - "क्षेत्रस्य पतिना वयम्" इत्यस्मिन् प्रयोगे समासाभावात् पतिः समास एव इति सूत्रेण घिसंज्ञायाम् अप्राप्तायाम् षष्ठीयुक्तश्छन्दसि इति प्रकृतसूत्रेण क्षेत्रस्य इति

षष्ठ्यन्तेन युक्तस्य पतिशब्दस्य विकल्पेन घिसंज्ञायाम् पतिशब्दात् विहितस्य टाप्रत्ययस्य स्थाने आङो नास्त्रियाम् इति योगेन आङः नादेशे **पतिना** इति रूपम् सिध्यति (तृतीयैकवचनस्य टाविभक्तेः आङ्संज्ञा इति प्राचीनवैयाकरणाः)। घिसंज्ञाभावे **पत्या** इति रूपम्। लोके तु समासे एव घिसंज्ञा। यथा **भूपतिना** इति। असमासस्थले तु **पत्या** इत्येव प्रयोगः।

१६.४) अयस्मयादीनि च्छन्दसि॥ (१.४.२०)

सूत्रार्थः - अयस्मादीनि छन्दसि साधूनि।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् द्वे पदे स्तः। अयस्मयादीनि छन्दसि इति च। अयस्मयादीनि इति प्रथमान्तं पदम्। अयस्मयः आदिः येषां तानि इमानि अयस्मयादीनि इति बहुव्रीहिसमासः। च्छन्दसि इति सप्तम्यन्तं पदम्, अत्र वैषयिकसप्तमी। ततश्च सूत्रार्थो भवति अयस्मयादीनि पदानि छन्दसि विषये साधूनि भवन्ति। अयस्मयादयः शब्दाः वेदे साधुशब्दत्वेन व्यवह्रियन्ते अर्थात् प्रयोजनानुसारं भसंज्ञा पदसंज्ञा च विधीयेते। अस्यैव अर्थस्य प्रतिपादकम् उभयसंज्ञान्यपि इति वक्तव्यम् इति वार्तिकमपि अत्र पठितम्। भसंज्ञायाः पदसंज्ञायाः च अधिकारे अस्य सूत्रस्य पाठात् वेदे अयस्मयः इत्यादीनां शब्दानां साधुत्वमङ्गीक्रियते।

उदाहरणम् - स सुष्टुभा स **ऋक्वता** गणेन (ऋ.३-७-२६)।

सूत्रार्थसमन्वयः - अयस्मयादिगणे ऋक्वता इति शब्दः पठितः अस्ति। ऋचः अस्य सन्ति इति विग्रहे ऋच्-शब्दोत्तरम् मतुप्प्रत्यये मकारस्य च वकारादेशे ऋच्वत् इत्यवस्थायाम्, उभयसंज्ञान्यपि इति वक्तव्यम् इति वार्तिकबलात् पदसंज्ञायां चोः कुः इत्यनेन सूत्रेण पदान्तस्य चकारस्य कुत्वे ककारः। तस्मात् ऋक्वत् इति शब्दो निष्पद्यते। तस्य च शब्दस्य तृतीयैकवचने **ऋक्वता** इति रूपम्। भसंज्ञायां सत्याम् च झलां जशोऽन्ते इत्यनेन सूत्रेण न जश्त्वम् तेन न ककारस्य गकारः। जश्त्वविधानार्थायाः पदंज्ञायाः भत्वसामर्थ्येन बाधात्। अन्यथा जश्त्वमेव स्यात् कुत्वं न स्यात् इति इष्टप्रयोगहानिः स्यात्। अत एव उक्तवाक्यान्तर्गते ऋक्वता इति पदे पदत्वात् कुत्वं भत्वात् जश्त्वाभाव एव। न चात्र अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा इति न्यायम् प्रबाध्य उभयसंज्ञाविधाने किम् प्रमाणम् आनन्तर्यात् एकैव संज्ञा स्यात् इति वाच्यम्। उभयसंज्ञान्यपि इति वक्तव्यम् इति वार्तिकोक्तत्वात्। लोके तु **ऋग्वता** इति रूपम्।

अयसो विकारः इति विग्रहे मयड् वैतयोर्भाषायाम् इत्यनेन मयटि प्रक्रियया अयस् मय इति स्थिते लोके सकारस्य रुत्वे रोश्च उत्वे अय् अ उ मय इति जाते आद्गुणः इति गुणैकादेशे ओकारे विभक्तिकार्ये च **अयोमयः** इति रूपम् भवति इति लोके। परन्तु पूर्वोक्तसूत्रे अयस्मय इत्येवं पाठदर्शनात् छन्दसि सकारस्य रुत्वाभावः भसंज्ञया सिध्यति। तेन **अयस्मयः** इत्येव रूपम् वेदे।

१६.५) छन्दसि परेऽपि॥ (१.४.८१)

सूत्रार्थः -छन्दसि गत्युपसर्गसंज्ञकाः धातोः परेऽपि भवन्ति।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् त्रीणि पदानि सन्ति। छन्दसि परे अपि इति सूत्रगतपदच्छेदः। परे अपि इत्यत्र एङः पदान्तादति इत्यनेन पूर्वरूपः। छन्दसि इति सप्तम्यन्तं पदम्, अत्र वैषयिकसप्तमी।

परे इति प्रथमाबहुवचनान्तम्। अपि इति अव्ययपदम्। ते प्राग्धातोः इति सूत्रात् ते इति धातोः चेति पदद्वयमनुवर्तते। ते इत्यनेन गतिसंज्ञकशब्दानाम् उपसर्गसंज्ञकशब्दानां च ग्रहणं भवति। सूत्रार्थो भवति - छन्दोविषये गतिसंज्ञकशब्दाः उपसर्गसंज्ञकशब्दाः धातोः परे अपि स्युः इति।

उदाहरणम् - याति नि हस्तिना। निहन्ति मुष्टिना।

सूत्रार्थसमन्वयः- याति नि हस्तिना इति छान्दसः प्रयोगः। अत्र नि इति गतिसंज्ञकः अस्ति। प्रकृतसूत्रेण गतिसंज्ञकस्य नि-इत्यस्य याति इति धातोः परम् प्रयोगः सिध्यति। लोके तु **ते प्राग्धातोः** इति नियमेन धातोः पूर्वमेव गत्युपसर्गसंज्ञकाः शब्दाः प्रयुज्यन्ते।

१६.६) व्यवहिताश्च॥ (१.४.८२)

सूत्रार्थः - छन्दसि गत्युपसर्गसंज्ञकाः व्यवहिताः अपि भवन्ति।

सूत्रावतरणम्- वेदे गतिसंज्ञकानाम् उपसर्गसंज्ञकानां च शब्दानाम् व्यवधानेनापि धातोः परम् पूर्वं वा प्रयोगार्थं सूत्रमिदम् आरब्धम्।

सूत्रव्याख्या - अस्मिन् सूत्रे द्वे पदे स्तः। व्यवहिताः च इति सूत्रगतपदच्छेदः। व्यवहिताः इति प्रथमान्तं पदम्। चेति अव्ययपदम्। छन्दसि परेऽपि इति सूत्रात् छन्दसि इति पदमनुवर्तते, अत्र वैषयिकसप्तमी। ते प्राग्धातोः इति सूत्रात् ते इति धातोः चेति पदद्वयमनुवर्तते। ते इत्यनेन गतिसंज्ञकशब्दानाम् उपसर्गसंज्ञकशब्दानां च ग्रहणं भवति। सूत्रार्थो हि वेदे गतिसंज्ञकशब्दानाम् उपसर्गसंज्ञकशब्दानाम् च अपरेण केनचित् शब्देन व्यवहितत्वेऽपि प्रयुज्यन्ते। ततः व्यवधानेन गत्युपसर्गसंज्ञकशब्दाः धातोः पूर्वम् परम् वा प्रयुज्यन्ते इति सूत्रस्यास्य आशयः। छन्दसि गत्युपसर्गसंज्ञकाः परेऽपि प्रयोक्तव्याः इति सूत्रस्य भावः।

उदाहरणम् - हरिभ्यां याह्योक आ। आ मन्द्रैरिन्द्र हरिभिर्याहि।

सूत्रार्थसमन्वयः - याहि ओक आ इत्यत्र अत्र 'आ' इत्युपसर्गस्य **ते प्राग्धातोः** इति सूत्रानुसारं याहि इत्यस्मात् पूर्वमेव प्रयोगे आयाहि इति प्राप्ते व्यवहिताश्च इति प्रकृतसूत्रबलेन आ इत्यस्य परे प्रयोगात् **हरिभ्यां याह्योक आ** इति सिद्ध्यति। सूत्रे अपि-शब्दसामर्थ्यात् व्यवहिताश्च इति सूत्रबलाच्च 'आ' इत्यस्य व्यवहितत्वेन पूर्वप्रयोगे सति **आ मन्द्रैरिन्द्र हरिभिर्याहि** इति प्रयोगः सिध्यति। एवं छन्दसि उपसर्गानां व्यवहारो दृश्यते। लोके तु उपसर्गाणां प्रयोगः धातोः पूर्वमेव भवति। धातूपसर्गयोः मध्ये न कोऽपि व्यवधानं भवति।

पाठगतप्रश्नाः- १

१. छन्दसि पुनर्वस्वोरेकवचनम् इत्यस्य कोऽर्थः।

२. षष्ठ्यन्तेन युक्तस्य पतिशब्दस्य विकल्पेन घिसंज्ञा केन भवति।

३. गतिसंज्ञकानाम् उपसर्गसंज्ञकानां च धातोः व्यवहितरूपेण प्रयोगः केन सूत्रेण भवति।

४. किं नक्षत्रम् अनुसृत्य वैशाखमासस्य नामकरणं जातम् अस्ति।

५. छन्दसि परेऽपि इति सूत्रस्य कः अर्थः।
६. षष्ठीयुक्तश्छन्दसि वा इति सूत्रेण का परिभाषा ज्ञापिता।
७. षष्ठीयुक्तश्छन्दसि वा इत्यस्य कोर्थः।
८. लोके असमासे पतिशब्दस्य घिसंज्ञा भवति न वा।

१६.७) तृतीया च होश्छन्दसि॥ (२.३.३)

सूत्रार्थः - जुहोतेः कर्मणि तृतीया स्याद्द्वितीया च।

सूत्रावतरणम्- वेदे हु-धातोः कर्मणि द्वितीयायाः तृतीयायाश्च विधानार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या - विधायकसूत्रमिदम्। अनेन द्वितीयाविभक्तिः तृतीयाविभक्तिश्च विधीयेते। अस्मिन् सूत्रे चत्वारि पदानि सन्ति। तृतीया च होः छन्दसि इति सूत्रगतपगच्छेदः। तृतीया इति प्रथमान्तं पदम्। च इत्यव्ययपदम्। होः इति षष्ठ्यन्तं पदम्। होः इत्यस्य जुहोतेः धातोः इत्यर्थः। छन्दसि इति सप्तम्यन्तं पदम्, अत्र वैषयिकसप्तमी, तस्य च वेदे इत्यर्थः। अनभिहिते इति अधिकारः। कर्मणि द्वितीया इति सम्पूर्णं सूत्रमत्रानुवर्तते। सूत्रस्थचकारेण द्वितीयाविभक्तिरपि भवति इति बोद्धव्यम्। सूत्रार्थो हि छन्दसि विषये जुहोतेः धातोः अनभिहिते कर्मणि तृतीया द्वितीया च भवति इति।

उदाहरणम् - यवाग्वा/यवागूम् अग्निहोत्रं जुहोति।

सूत्रार्थसमन्वयः - पूर्वस्मिन् वैदिके वाक्ये हु-धातोः कर्म अस्ति यवागूः इति। अतः प्रकृतसूत्रेण यवागू-शब्दात् तृतीयाविभक्तौ **यवाग्वा** इति रूपं सिध्यति। विकल्पेन द्वितीयविभक्तौ **यवागूम् अग्निहोत्रं जुहोति** इति वाक्यमपि सिध्यति।

१६.८) द्वितीया ब्राह्मणे॥ (२.३.६०)

सूत्रार्थः - ब्राह्मणविषयके प्रयोगे दिवस्तदर्थस्य कर्मणि द्वितीया स्यात्।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् द्वे पदे स्तः। द्वितीया इति प्रथमान्तं पदम्। ब्राह्मणे इति सप्तम्यन्तं पदम्। अत्र च विषयसप्तमी। तेन ब्राह्मणे इत्यस्य ब्राह्मणविषये इत्यर्थो भवति। दिवस्तदर्थस्य इति सम्पूर्णं सूत्रमत्रानुवर्तते। तदर्थशब्देन वि-अव-पूर्वकहृधात्वर्थतुल्यधातोः पण्धात्वर्थतुल्यधातोः च ग्रहणम्। स च दिव्धातुः इति दिवस्तदर्थस्य इति सूत्रे स्पष्टम्। अधीगर्थदयेशां कर्मणि इति सूत्रात् कर्मणि इति पदमनुवर्तते। सूत्रार्थो हि ब्राह्मणविषयकप्रयोगे दिवस्तदर्थस्य कर्मणि षष्ठी स्यात् इति। मन्त्रव्यतिरेको वेदभागो ब्राह्मणम्।

दिवस्तदर्थस्य इति सूत्रेण द्यूतार्थकस्य क्रयविक्रयरूपव्यवहारार्थकस्य च दिव्धातोः कर्मणि षष्ठी भवति यथा शतस्य दीव्यति इत्यत्र द्यूतार्थस्य क्रयविक्रयरूपव्यवहारार्थस्य च दिव्धातोः प्रयोगः अस्ति। अत्र दिव्धातोः कर्म शतम् अस्ति। अतः दिवस्तदर्थस्य इत्यनेन षष्ठीविभक्तौ शतस्य इति प्रयोगः भवति।

किन्तु प्रकृते दिवस्तदर्थस्य इत्यनेन कर्मणि षष्ठीविभक्तेः प्राप्तौ तस्य बाधकः द्वितीया ब्राह्मणे इत्ययम योगः आरभ्यते। अतः तस्य अपवादः द्वितीया ब्राह्मणे इत्ययम् योगः।

उदाहरणे सूत्रार्थसमन्वयः - गामस्य तदहः सभायां दीव्येयुः इत्युदाहरणे दिव्-धातोः कर्मणः गोशब्दात् द्वितीयाविभक्तिः भवति। न तु षष्ठी। यतो हि अत्र ब्राह्मणविषयकः प्रयोगः अस्ति। अपि च पणार्थकस्य व्यवहृर्थकस्य च दिव्-धातोः प्रयोगोऽपि वर्तते। किञ्च दिव्-धातुवाच्यक्रियायाः कर्म गौः वर्तते। लोके तु **गोः** तदहः सभायां दीव्येयुः इति प्रयोगः।

१६.९) चतुर्थ्यर्थे बहुलं छन्दसि॥ (२.३.६३)

सूत्रार्थः - छन्दसि चतुर्थ्यर्थे बहुलं षष्ठी स्यात्।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् त्रीणि पदानि सन्ति, चतुर्थ्यर्थे बहुलं छन्दसि इति। चतुर्थ्यर्थे इति सप्तम्यन्तं पदम्। बहुलम् इति प्रथमान्तं पदम्। छन्दसि इति सप्तम्यन्तं पदम्। अत्र विषयसप्तमी वर्तते। षष्ठी शेषे इति सूत्रात् शेषे इति पदमनुवर्तते। ततश्च सूत्रार्थो भवति वेदे चतुर्थ्यर्थे बहुलं षष्ठी स्यात् इति। बहुलम् किम् इति उच्यते -

"क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव।
विधेर्विधानं बहुधा समीक्ष्य चातुर्विधं बाहुलकं वदन्ति॥" इति॥

तदर्थः - सूत्रोक्तकार्यस्य कुत्रचित् प्राप्तिः नास्ति चेदपि प्रवृत्तिः स्यात्। किञ्च कुत्रचित् प्राप्तिः अस्ति चेदपि न प्रवर्तते। अपि च क्वचित् विकल्पेन प्रवृत्तिः भवति। किञ्च कुत्रचिदन्यदेव भवति।

उदाहरणम्- गोधाकालकादार्वाखाटस्ते वनस्पतीनाम् इति।

सूत्रार्थसमन्वयः - पूर्वोक्ते उदाहरणे वनस्पतीनाम् इत्यत्र षष्ठी विभक्तिः वनस्पतिभ्यः इति चतुर्थ्यर्थे। तस्मात् गोधाकालकादार्वाखाटस्ते वनस्पतिभ्यः इत्येवम् अर्थः बोद्धव्यः। सूत्रे बहुलग्रहणात् वेदे षष्ठ्यर्थे चतुर्थ्यपि सङ्गच्छते। यथा या खर्वेन पिबति तस्यै खर्वः इत्यत्र **तस्यै** इति चतुर्थ्यन्तम् पदम् **तस्याः** इति षष्ठ्यर्थे प्रयुक्तम्।

१६.१०) यजेश्च करणे॥ (२.३.६३)

सूत्रार्थः - यजेः करणे छन्दसि बहुलं षष्ठी स्यात्।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् त्रीणि पदानि सन्ति। यजेः च करणे इति सूत्रगतपदच्छेदः। यजेः इति षष्ठ्यन्तं पदम्। च इति अव्ययपदम्। करणे इति सप्तम्यन्तं पदम्। चतुर्थ्यर्थे बहुलं छन्दसि इति सूत्रात् बहुलम्, छन्दसि चेति पदे अनुवर्तेते। छन्दसि इत्यत्र वैषयिकसप्तमी। षष्ठी शेषे इति सूत्रात् शेषे इति पदमनुवर्तते। सूत्रार्थो हि यजेः करणकारके वेदविषये बहुलं षष्ठी स्यात् इति। बहुलम् किम् भवतीति तु पूर्वसूत्रे उक्तमेव।

उदाहरणम् - घृतस्य घृतेन वा यजते।

सूत्रार्थसमन्वयः - पूर्वोक्ते उदाहरणे यज्धातोः करणं भवति घृतम्। तस्मात् प्रकृतसूत्रेण घृतशब्दात् बाहुलकात् करणकारके षष्ठी विभक्तिः भवति। सूत्रे 'बहुलम्' इति पदस्यानुवृत्तौ षष्ठ्यभावपक्षे

तृतीयाविभक्तौ घृतेन यजते इत्यपि प्रयोगः। तेन **घृतस्य घृतेन वा यजते** इति प्रयोगः सिध्यति। लोके तु **घृतेन यजते** इत्येक एव प्रयोगो भवति।

१६.११) बहुलं छन्दसि॥ (२.४.३९)

सूत्रार्थः - छन्दसि अदो घस्लृ इत्यादेशः स्यात्।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् द्वे पदे स्तः। बहुलम् इति प्रथमान्तं पदम्। छन्दसि इति सप्तम्यन्तं पदम्, अत्र वैषयिकसप्तमी। अदो जग्धिर्ल्यप्ति किति इति सूत्रात् अदः इति षष्ठ्यन्तम् पदमत्रानुवर्तते। लुङ्सनोर्घस्लृ इति सूत्रात् घस्लृ इत्यनुवर्तते। आर्धधातुके इति अधिकारः। सूत्रार्थस्तावत् वेदे अदः स्थाने घस्लृ-आदेशः बहुलं स्यात् आर्धधातुके परे इति। बहुलार्थः पूर्वोक्तः।

उदाहरणम् - सग्धिः।

सूत्रार्थसमन्वयः - अद्-धातोः स्त्रियां क्तिन् इत्यनेन क्तिन्-प्रत्यये अनुबन्धलोपे अद् ति इति स्थिते बहुलम् छन्दसि इति प्रकृतसूत्रेण अदः स्थाने घस्लृ इत्यादेशे अनुबन्धलोपे च घस् ति इति जाते घसिभसोर्हलि च इति सूत्रेण घसः उपधालोपे घ् स् ति इति जाते झलो झलि इत्यनेन सूत्रेण सकारस्य लोपे घ् ति इति जाते झषस्तथोर्धोऽधः इति सूत्रेण तकारस्य धकारे घ् धि इति जाते झलां जश् झशि इत्यनेन सूत्रेण घकारस्य स्थाने जशि गकारे ग्धि इति रूपं सिद्ध्यति। ततः समानशब्देन सह पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च इत्यनेन सूत्रेण समासे कृते समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु इत्यनेन सूत्रेण समानस्य स्थाने स इत्यादेशे **सग्धिः** इति रूपम् सिद्ध्यति।

१६.१२) हेमन्तशिशिरावहोरात्रे च छन्दसि॥ (२.४.२८)

सूत्रार्थः - हेमन्तशिशिरौ, अहोरात्रे इत्येतयोः छन्दसि पूर्ववत् लिङ्गम् भवति।

सूत्रव्याख्या - विधिसूत्रमिदम्। अस्मिन् सूत्रे चत्वारि पदानि सन्ति। हेमन्तशिशिरौ अहोरात्रे च छन्दसि इति सूत्रगतपदच्छेदः। हेमन्तशिशिरौ इति प्रथमान्तं पदम्। हेमन्तश्च शिशिरश्च हेमन्तशिशिरौ। अहोरात्रे इति प्रथमाद्विवचनान्तं पदम्। च इति अव्ययपदम्। छन्दसि इति सप्तम्येकवचनान्तं पदम्। पूर्ववदश्ववडवौ इति सूत्रात् पूर्ववत् इति पदमनुवर्तते। परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः इति सूत्रात् द्वन्द्वः इति पदमनुवर्तते। सूत्रार्थो भवति वेदे द्वन्द्वसमासनिष्पन्नयोः हेमन्तशिशिरौ अहोरात्रे इति एतयोः शब्दयोः पूर्ववत् लिङ्गं स्यात् इति। पूर्ववत् इत्यस्य पूर्वपदवत् इत्यर्थः।

उदाहरणे सूत्रार्थसमन्वयः - अहश्च रात्रिश्च इति विग्रहे द्वन्द्वसमासे सति अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः इति सूत्रेण समासान्ते अच्प्रत्यये अहोरात्रि अ इति स्थिते यस्येति च इति सूत्रेण इकारस्य लोपे अहोरात्र इति जायते। ततः रात्राह्नाहाः पुंसि इति सूत्रेण रात्रादिशब्दानां पुंसि व्यवहारो विधीयते इत्यतः **अहोरात्रौ** इति रूपं सिद्ध्यति इति वेदे। परन्तु वेदे अहन् इति पूर्वपदस्य नपुंसकलिङ्गकत्वात् **अहोरात्रे** इति रूपं भवति। तथा च प्रयोगः अहोरात्रे इदं ब्रूमः इति। न केवलम् द्विवचने अयम् नियमः। अपि तु बहुत्वविवक्षायामपि पूर्वपदवत् लिङ्गं भवितुमर्हति। तदुदाहरणं हि अहोरात्राणि विदधत् इति।

हेमन्तश्च शिशिरश्च हेमन्तशिशिरौ। हेमन्तशब्दस्य पुंलिङ्गत्वात् **हेमन्तशिशिरौ** इति रूपं जायते इति वेदे। किन्तु लोके **हेमन्तशिशिरे** इति प्रयोगः। किन्तु हेमन्तः शिशिरोऽस्त्रियाम् इत्यमरवचनात् शिशिरशब्दस्य अस्त्रियाम् अर्थात् पुंसि स्त्रियां च प्रयोगो दृश्यते। तथा च शिशिरशब्दस्य पुंलिङ्गपक्षे सूत्रस्य वैयर्थ्यापत्तिः। नपुंसके व्यवह्रियते चेत् समस्तपदस्य परवल्लिङ्गम् स्यात् अर्थात् नपुंसकम् स्यात् तन्निवृत्तये प्रकृतसूत्रम् आवश्यकम्।

१६.१३) बहुलं छन्दसि॥ (२.४.७३)

सूत्रार्थः - छन्दसि अदिप्रभृतिभ्यः विहितस्य शपः बहुलं लुक् स्यात्।

सूत्रव्याख्या - सूत्रमिदम् विधिसूत्रम्। अस्मिन् सूत्रे द्वे पदे स्तः। बहुलम् छन्दसि इति सूत्रगतपदच्छेदः। बहुलम् इति प्रथमान्तं पदम्। छन्दसि इति सप्तम्यन्तं पदम्, अत्र वैषयिकसप्तमी। अदिप्रभृतिभ्यः शपः इति सम्पूर्णं सूत्रमत्रानुवर्तते। ण्यक्षत्रियार्षञितो यूनि लुगणिञोः इति सूत्रात् लुक् इति पदमनुवर्तते। सूत्रार्थस्तावत् वेदे अदिप्रभृतिभ्यः विहितस्य शपः बहुलं लुक् स्यात् इति। बहुलार्थः उक्तः एवास्ति।

उदाहरणम् - शयते।

सूत्रार्थसमन्वयः - शी-धातोः लट्-लकारे शी ल् इति स्थिते लस्य स्थाने तकारादेशे शी त इति जाते कर्तरि शप् इत्यनेन शप्-प्रत्यये शी अ त इति जाते अदिप्रभृतिभ्यः शपः इत्यनेन शपः लुकि प्राप्ते प्रकृतसूत्रेण तन्निषेधे शी अ त इति जाते शीङः सार्वधातुके गुणः इत्यनेन ईकारस्य गुणे एकारे शे अ त इति जाते एचोऽयवायावः इत्यनेन एकारस्य स्थाने अयादेशे शय् अ त इति जाते टित आत्मनेपदानां टेरे इत्यनेन टेः तकारोत्तराकारस्य एकारे सर्ववर्णसम्मेलने **शयते** इति रूपम् सिध्यति। लोके तु **शेते** इति रूपम्।

१६.१४) बहुलं छन्दसि॥ (२.४.७६)

सूत्रार्थः - छन्दसि जुहोत्यादिभ्यः विहितस्य शपः बहुलं श्लुः स्यात्।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् द्वे पदे स्तः। बहुलम्, छन्दसि इति सूत्रगतपदच्छेदः। बहुलम् इति प्रथमान्तं पदम्। छन्दसि इति सप्तम्यन्तं पदम्, अत्र वैषयिकसप्तमी। अदिप्रभृतिभ्यः शपः इति सूत्रात् शपः इति पदमनुवर्तते। जुहोत्यादिभ्यः श्लुः इति सम्पूर्णं सूत्रमत्रानुवर्तते। सूत्रार्थो हि छन्दसि विषये जुहोत्यादिभ्यः विहितस्य शपः श्लुः बहुलम् स्यात् इति। अर्थात् शपः स्थाने विहितोऽपि श्लुः आदेशः कदाचित् न भवति। कदाचित् च शपः स्थाने अविहितोऽपि श्लुः आदेशो भवति इति सूत्रे बहुलग्रहणस्य अयम् आशयः।

उदाहरणम् - दाति प्रियाणि चिद्वसु (ऋ.७.१६.११)।

सूत्रार्थसमन्वयः - दाधातोः लट्-लकारे दा ल् इति स्थिते लकारस्य स्थाने तिबादेशेऽनुबन्धलोपे दा ति इति जाते शपि कृते जुहोत्यादिभ्यः श्लुः इत्यनेन शपः श्लौ श्लौ इत्यनेन दा इत्यस्य दित्वे दा दा ति इति जाते द्विरुक्तस्य पूर्वभागस्य पूर्वोऽभ्यासः इत्यनेन अभ्याससंज्ञायां ह्रस्वः

इत्यनेन अभ्यासस्य अचः ह्रस्वे द दा ति इति जाते सर्ववर्णसम्मेलने **ददाति** इति रूपं सिध्यति इति लोके। प्रकृतसूत्रेण शपः श्लुः न भवति चेत् श्लौ इति सूत्रस्य नैव अवसरः तेन **दाति** इति रूपम् सिध्यति इति वेदे।

१६.१५) कृमृदुरुहिभ्यश्छन्दसि॥ (३.१.५९)

सूत्रार्थः - कृ-मृदु-रुहिभ्यः धातुभ्यः च्लेः अङ् आदेशः वा छन्दसि कर्तरि।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् द्वे पदे स्तः। कृमृदुरुहिभ्यः छन्दसि सूत्रगतपदच्छेदः। कृमृदुरुहिभ्यः इति पञ्चमीबहुवचनान्तम्। छन्दसि इति सप्तम्यन्तं पदम्, अत्र वैषयिकसप्तमी। च्लि लुङि इत्यतः च्लिः इति, अस्यतिवक्तिख्यादिभ्योऽङ् इत्यतः अङ् इति, इरितो वा इत्यतः वा इति च अनुवर्तन्ते। धातोरेकाचो हलादेः क्रियासमभिहारे यङ् इति सूत्रतः धातोः इत्यनुवर्तते। तच्च पञ्चमीबहुवचनान्ततया विपरिणमते। च्लेः सिच् इत्यतः च्लेः इत्यपि अनुवर्तते। सूत्रार्थो हि वेदे कर्त्रर्थे कृमृदुरुहिभ्यः धातुभ्यः विहितस्य च्लेः स्थाने अङ् आदेशो विकल्पेन भवति इति सूत्रार्थः।

उदाहरणम् - इदं तेभ्योऽकरं नमः।

सूत्रार्थसमन्वयः - पूर्वोक्ते उदाहरणे अकरवम् इत्यत्र कृधातोः लुङि लुङः स्थाने मिप्-आदेशे मेः स्थाने अम्-आदेशे कृ अम् इति स्थिते धातोः अट् आगमे अनुबन्धलोपे अ कृ अम् इति जाते च्लि लुङि इति च्लौ प्रकृतसूत्रेण च्लेः स्थाने अङादेशे अनुबन्धलोपे ऋदृशोऽङि गुणः इत्यनेन धातोः ऋकारस्य गुणे अकारे उरण् रपरः इति रपरत्वे **अकरम्** इति रूपम् सिध्यति। लोके च्लेः सिचि **अकार्षम्** इति रूपम् जायते। एवम् मृधातोः तिपि वेदे **अमरत्**, लोके तु **अमृत** इति रूपम्। दृधातोः तिपि वेदे **अदरत्**, लोके तु **अदारीत्** इति रूपम्। रुह् धातोः तिपि वेदे **आरुहत्**, लोके तु **अरुक्षत्** इति रूपम्।

पाठगतप्रश्नाः- २

९. जुहोतेः कर्मणि तृतीयाद्वितीययोः वैकल्पिकविधानं केन सूत्रेण भवति।
१०. द्वितीया ब्राह्मणे इत्यत्र कीदृशी सप्तमी।
११. द्वितीया ब्राह्मणे इति कस्य अपवादः।
१२. चतुर्थ्यर्थे बहुलं छन्दसि इत्यस्मिन् सूत्रे चतुर्थ्यर्थे कस्याः विभक्तेः विधानं भवति।
१३. घृतस्य यजते इत्यत्र षष्ठीविधायकं सूत्रं किम्।
१४. अहोरात्रे इत्यत्र पूर्ववल्लिङ्गविधायकं सूत्रं किम्।
१५. बहुलं छन्दसि इत्यनेन केषां शपः बहुलं लुक् भवति।
१६. छन्दसि जुहोत्यादिभ्यः शपः बहुलं श्लुविधायकं सूत्रं किम्।
१७. बहुलं छन्दसि इत्यनेन केषां शपः बहुलं श्लुः भवति।
१८. अमरत् इत्यस्य लौकिकम् रूपम् किम्।
१९. अकरम् इत्यस्य लौकिकम् रूपम् किम्।

२०. कृमृदुरुहिभ्यश्छन्दसि इति सूत्रेण च्लेः स्थाने किम् विधीयते सिच् अङ् वा।

पाठसारः

एतवता भवन्तः दृष्टवन्तः यत् - छन्दसि नक्षत्रवाचकात् पुनर्वसुशब्दात् विशाखशब्दात् च द्वित्त्वे वाच्ये विकल्पेन एकवचनम् भवति, लोके तु द्विवचनमेव। छन्दसि अयस्मयादीनि पदानि निपात्यन्ते। गतिसंज्ञकाः उपसर्गसंज्ञकाः च शब्दाः व्यवधानेन धातोः परे पूर्वे वा भवन्ति। छन्दसि हु धातोः कर्मणि तृतीयापि भवति। छन्दसि चतुर्थ्यर्थे बहुलं षष्ठ्याः अपि प्रयोगो भवति। किञ्च यज् धातोः करणे बहुलं षष्ठीविभक्तिः अपि भवति। छन्दसि अद् धातोः बहुलं घस्लृ इत्यादेशः भवति। छन्दसि अदिप्रभृतिभ्यः विहितस्य शपः बहुलं लुक् भवति। छन्दसि जुहोत्यादिभ्यः विहितस्य शपः बहुलं लुक् भवति। किञ्च षष्ठीयुक्तश्छन्दसि इत्यस्य योगविभागः प्रदर्शितः। तेन च योगविभागेन सर्वे विधयश्छन्दसि विकल्प्यन्ते इति परिभाषा ज्ञापिता। ततः वेदे सर्वोऽपि विधिः विकल्पेन भवति इति आयातम्।

पाठान्तप्रश्नाः

१. षष्ठीयुक्तश्छन्दसि इति सूत्रं व्याख्यात।
२. अयस्मयादीनि छन्दसि इति सूत्रं व्याख्यात।
३. छन्दसि परेऽपि व्यवहिताश्च इत्यनयोः व्याख्या कार्या।
४. चतुर्थ्यर्थे बहुलं छन्दसि इति सूत्रं व्याख्यात।
५. कृमृदुरुहिभ्यश्छन्दसि इति सूत्रं व्याख्यात।
६. सग्धिः इति रूपं साधयत।
७. शयते इति रूपं साधयत।
८. दाति इति रूपं साधयत।
९. पतिना इत्यत्र कथम् पतिशब्दस्य घिसंज्ञा।
१०. द्वितीया ब्राह्मणे इत्यस्य व्याख्या कार्या।

पाठगतप्रश्नानाम् उत्तराणि

१. छन्दसि पुनर्वस्वोः नक्षत्रयोः द्वित्त्वे एकवचनम् विकल्पेन स्यात् इत्यर्थः।
२. षष्ठीयुक्तश्छन्दसि वा।
३. व्यवहिताश्च इत्यनेन सूत्रेण।
४. 'विशाखा' इति नक्षत्रस्य नामानुसारं 'वैशाख' इति मासस्य नामकरणं जातम्।

५. छन्दसि विषये गतिसंज्ञकाः उपसर्गसंज्ञकाः च धातोः परे अपि स्युः इति।

६. सर्वे विधयश्छन्दसि विकल्प्यन्ते।

७. षष्ठ्यन्तेन युक्तः पतिशब्दः छन्दसि घिसंज्ञो वा स्यात्।

८. न भवति।

९. तृतीया च होश्छन्दसि।

१०. विषयसप्तमी।

११. दिवस्तदर्थस्य।

१२. षष्ठ्याः।

१३. यजेश्च करणे।

१४. हेमन्तशिशिरावहोरात्रे च छन्दसि इत्यनेन।

१५. अदिप्रभृतिभ्यः।

१६. बहुलं छन्दसि।

१७. जुहोत्यादिभ्यः शपः बहुलं श्लुः भवति।

१८. अमृत।

१९. अकार्षीत्।

२०. अङ्।

इति षोडशः पाठः